உ

A. यं पालयसि धर्मं त्वं धृत्या च नियमेन च।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु॥ १

B. रामेण तापसी पृष्टा सा सिद्धा सिद्धसम्मता।
शशंस शबरी वृद्धा रामाय प्रत्युपस्थिता॥ २

C. वानरोऽहं महाभागे दूतो रामस्य धीमतः।
रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्॥ ३

D. मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीस्समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥ ४

E. स नलेन कृतस्सेतुः सागरे मकरालये ।

शुशुभे सुभगः श्रीमान् स्वातीपथ इवाम्बरे ॥ ५

F. संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् ।

उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥ ६

G. किं त्वाऽमन्यत वैदेहः पिता मे थिलाधिपः।

राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥ ७

H. बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणा ।

मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तश्श्रूयतान्नरः ॥ ८

I. वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ।
कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ॥
अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना ।
सलिलेन सहस्राक्षन् वसवो वासवं यथा ॥ ९

J. गगनाच्छङ्करशिरस्ततो धरणिमाश्रिता ।
व्यसर्पत जलं तत्र तीव्रशब्दपुरस्कृतम् ॥ १०

K. सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥ ११

L. त्रिकूटशृङ्गाग्रतले विचित्रे

प्रतिष्ठितो वानरराजसिंहः।

प्रदीप्तलाङ्गूलकृतार्चिमाली

व्यराजताऽऽदित्य इवांशुमाली ।।१२

M. सीता कपीन्द्रक्षणदाचराणां

राजीवहेमज्वलनोपमानि ।

सुग्रीवरामप्रणयप्रसङ्गे

वामानि नेत्राणि समं स्फुरन्ति ।। १३

N. तदिदं वैष्णवं राम पितृपैतामहं महत् ।
क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमम् ।। १४

O. ओषधीर्नावगच्छामि तानहं हरिपुङ्गव ।
तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ।। १५

P. इयं सीता मम सुता सहधर्मचरी तव ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।।
पतिव्रता महाभागा छायेवानुगता सदा ।
इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ।। १६

Q. गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥ १७

R. छत्रं धारयत क्षिप्रम् आर्यपादाविमौ मतौ ।
आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम ॥

S. राज्ञ: पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ।
गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमा: ॥ १९

T. एष सर्वस्वभूतस्तु परिष्वङ्गो हनुमतः ।
मया कालमिमम् प्राप्य दत्तस्तस्य महात्मनः ॥ २०